# Brahmaproktam Shiva Stotram

# બ્રહ્માપ્રોક્તં શિવસ્તોત્રમ્

## Document Information

Text title : Brahmaproktam Shiva Stotram

File name : brahmAproktaMshivastotram.itx

Category : shiva, stotra, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 10 | 439.2-516.1||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં શિવસ્તોત્રમ્

નમસ્તે દેવદેવાય નમસ્તેઽનન્તમૂર્તયે ॥ ૪૩૯॥

નમો લોકૈકનાથાય નમસ્તે સર્વસાક્ષિણે ।
નમસ્તે નિર્વિકારાય નમસ્તેઽનન્તચક્ષુષે ॥ ૪૪૦॥

નમસ્તેઽનન્તહસ્તાય નમસ્તેઽનન્તરૂપિણે ।
નમસ્તે નિર્ગુણાનન્ત નમસ્તે સગુણ પ્રભો ॥ ૪૪૧॥

નમસ્તે જગદાધાર નમસ્તે વિશ્વભાવન ।
નમસ્તે સત્ત્વરૂપાય નમસ્તે લોકરૂપિણે ॥ ૪૪૨॥

નમસ્તે સર્વરૂપાય રૂપાતીતાય તે નમઃ ।
નમસ્તે શુદ્ધબુદ્ધાય નમસ્તે પરમાત્મને ॥ ૪૪૩॥

નમસ્તે લિઙ્ગરૂપાય નમસ્તે વિજ્વરાનઘ ।
નમો વેદાન્તવેદ્યાય નમસ્તે વેદરૂપિણે ॥ ૪૪૪॥

નમસ્તે જ્ઞાનરૂપાય નમસ્તે જ્ઞાનદાયક ।
નમસ્તે નિષ્પ્રપઞ્ચાય નિરીહાય નમોઽસ્તુ તે ॥ ૪૪૫॥

નિર્દ્વન્દ્વાય નમસ્તેઽસ્તુ નિર્મલાયાસ્તુ તે નમઃ ।
નિરવદ્ય નમસ્તેઽતુ નિરામય નમોઽસ્તુ તે ॥ ૪૪૬॥

નિષ્કલઙ્ક નમસ્તેઽસ્તુ વ્યાપકાય નમોઽસ્તુ તે ।
નમસ્તે યજ્ઞરૂપાય યજ્ઞકર્ત્રે નમોઽસ્તુ તે ॥ ૪૪૭॥

નમસ્તે ભૂરિરૂપાય નમસ્તે શર્મદાયિને ।
નમો હિરણ્યહસ્તાય સેનાન્યે તે નમો નમઃ ॥ ૪૪૮॥

નમો દિક્પતયે તુભ્યં કક્ષાણાં પતયેનમઃ ।
નમઃ સસ્પિઞ્જરાયાદ્ય નમસ્તેઽસ્તુ ત્વિષીમતે ॥ ૪૪૯॥

નમઃ પથીનામ્પતયે કુલુઞ્ચાય નમોઽસ્તુ તે ।

વિવ્યાધિને નમોઽન્નાનાં પતયે તે નમો નમઃ ॥ ૪૫૦॥

નમસ્તે હરિકેશાય નમો ભાવ્યોપવીતિને ।
પુષ્ટાનાં પતયે તુભ્યં નમસ્તે પુષ્ટિદાયિને ॥ ૪૫૧॥

જગતાં પતયે નિત્યં નમો રુદ્રાય તે નમઃ ।
પરાતતાયિને નિત્યં નમસ્તે ગૂઢરૂપિણે ॥ ૪૫૨॥

ક્ષેત્રાણાં પતયે નિત્યં નમઃ સૂતાય તે નમઃ ।
નમો હન્ત્યાય દાર્ઢ્યાય વિશ્વગુપ્તાય તે નમઃ ॥ ૪૫૩॥

વનાનાં પતયે નિત્યં રોહિતાય નમોઽસ્તુ તે ।
નમઃ સ્થપતયે નિત્યં વૃક્ષાણાં પતયે નમઃ ॥ ૪૫૪॥

નમસ્તે મન્ત્રિણે નિત્યં વાણિજાય નમોઽસ્તુ તે ।
નમઃ સૂર્મ્યાય ચ પણ્ર્યાય પર્ણશદ્યાય તે નમઃ ॥ ૪૭૮॥

નમોઽપગુરમાણાય નમસ્તેઽભિઘ્નતે સદા ।
નમ આખિદતે નિત્યં નમઃ પ્રખિદતે સદા ॥ ૪૭૯॥

નમો વિશ્વસ્વરૂપાય ગુણાતીતાય તે નમઃ ।
નીલગ્રીવાય નિત્યાય શિતિકણ્ઠાય તે નમઃ ॥ ૪૮૦॥

વ્યુપ્તકેશાય તે નિત્યં સહસ્રાક્ષાય તે નમઃ ।
નમસ્તે ઘોરરૂપાય નમસ્તે શતધન્વને ॥ ૪૮૧॥

ગિરીશાય નમસ્તેઽસ્તુ શિપિવિષ્ટાય તે નમઃ ।
મીઢુષ્ટમાય દેવાય ભવ્યાયેષુમતે નમઃ ॥ ૪૮૨॥

નમો હ્રસ્વાય દેવાય વામનાય નમો નમઃ ।
નમોઽસ્તુ બૃહતે નિત્યં નમો વર્ષીયસે સદા ॥ ૪૮૩॥

નમો વૃદ્ધાય દેવાય નમઃ સંવૃધ્વનાય તે ।
નમોઽગ્રિયાય શૂરાય પ્રથમાય નમોનમઃ ॥ ૪૮૪॥

આશવે તે નમો નિત્યમજરાય ચ તે નમઃ ।
નમઃ શીઘ્રાય તે નિત્યં શીભ્યાય મહતે નમઃ ॥ ૪૮૫॥

નમ ઊર્વ્યાય નીપ્યાય વસ્વન્યાય નમોનમઃ ।
સ્રોતસ્યાય નમો નિત્યં દીપ્યાય ચ નમો નમઃ ॥ ૪૮૬॥

નમો જ્યેષ્ઠાય શૂરાય કનિષ્ઠાય ચ તે નમઃ ।
પૂર્વજાય નમસ્તેઽસ્તુ નમસ્તેઽપરજાય ચ ॥ ૪૮૭॥

મધ્યમાય નમસ્તેઽસ્તુ કૂશ્માણ્ડાય ચ તે નમઃ ।
નમઃ પરન્તપાયેશ તારાય સકલાત્મને ॥ ૪૮૮॥

જઘન્યાય નમસ્તેઽસ્તુ બુધ્નિયાય નમો નમઃ ।
સોભ્યાય પ્રતિસર્યાય નમો યામ્યાય તે નમઃ ॥ ૪૮૯॥

નમઃ ક્ષેમ્યાય વર્મ્યાય ઉર્વર્યાય નમો નમઃ ।
શ્લોક્યાય ચાવસાન્યાય નમો મઙ્ગલરૂપિણે ॥ ૪૯૦॥

નમો વન્યાય કક્ષ્યાય શ્રાવ્યાય ચ નમો નમઃ ।
પ્રતિશ્રાવ્યાય શાન્તાય શરણ્યાય નમો નમઃ ॥ ૪૯૧॥

નમઃ સદાશુષેણાય નમશ્ચાશુરથાય ચ ।
નમઃ શૂરસ્વરૂપાય ભેત્રે ચ ભયદાયિને ॥ ૪૯૨॥

નમોઽસ્તુ વર્મિણે તુભ્યં નમો નિત્યં વરૂથિને ।
બિલ્મિને ચ નમો નિત્યં નમઃ કબચિને સદા ॥ ૪૯૩॥

શ્રુતાય શ્રુતસેનાય દુન્દુભ્યાય ચ તે નમઃ ।
નમસ્તે આહનન્યાય ધૃષ્ણવે પ્રમૃશાય ચ ॥ ૪૯૪॥

તીક્ષ્ણેષવે નમસ્તુભ્યં નમ આયુધિને સદા ।
નમો ગોપ્ત્રે અશ્વહન્ત્રે આ(સ્વા)યુધાય સુધન્વને ॥ ૪૯૫॥

નમસ્તુત્યાય પથ્યાય નમઃ સૂદ્યાય તે નમઃ ।
સૂ(સ)રસ્યાય નમો નિત્યં નમો નાદ્યાય તે નમઃ ॥ ૪૯૬॥

વૈશન્તાય નમો નિત્યમગ્રગણ્યાય તે નમઃ ।
નમોઽસ્ત્વેકરૂપાય નમઃ કૂપ્યાય તે સદા ॥ ૪૯૭॥

નમો વન્દ્યાય વર્ષ્યાય વર્મ્યાયામૃતરૂપિણે ।
નમો મેધ્યાય ભૌમાય વિદ્યુત્યાય નમો નમઃ ॥ ૪૯૮॥

ઇધ્રિયાય નમસ્તેઽસ્તુ આતપ્યાય નમો નમઃ ।
નમો વાત્યાય રેશ્મ્યાય વાસ્તવ્યાય નમો નમઃ ॥ ૪૯૯॥

વાસ્તુપાય નમસ્તેઽસ્તુ નમઃ સામ્બાય સર્વદા ।
નમશ્ચન્દ્રકિરીટાય નિયતાય નમોઽસ્તુ તે ॥ ૫૦૦॥

નમોઽનન્તગુણોપેત સોમ સર્વોત્તમ પ્રભો ।
નમસ્તે ત્ર્યમ્બક શ્રીમન્ નમસ્તામ્રાય તે નમઃ ॥ ૫૦૧॥

નમો વિશ્વૈકનિલય નમો વિશ્વૈકસંસ્તુત ।
નમો વિધૂતપાપાય મહાદેવાય તે નમઃ ॥ ૫૦૨॥

નમસ્તે પાર્વતીનાથ નમસ્તે ત્રિપુરાન્તક ।
નમસ્તે કરુણાસિન્ધો નમસ્તે ભક્તવત્સલ ॥ ૫૦૩॥

નમસ્તે કાલકાલાય કાલકાલાય તે સદા ।
નમસ્તે કાલરૂપાય નમસ્તે વરદાય ચ ॥ ૫૦૪॥

નમઃ સર્વોત્તમ શ્રીમન્સદાશિવ નમોઽસ્તુ તે ।
હિરણ્યરૂપ ચિદ્રૂપ હિરણ્યનિલયામલ ॥ ૫૦૫॥

નમસ્તેઽસ્તુ હિરણ્યાત્મન્ હિરણ્યપતયે નમઃ ।
ન ત્વદન્યો મહાદેવ લોકનાથ જગન્મય ॥ ૫૦૬॥

ન ત્વદન્યઃ સુરારાધ્યો ન ત્વદન્યો જગત્પ્રભુઃ ।
નમો ભવાય ભીમાય ભગ્રાય ભવદાય તે ॥ ૫૦૭॥

દેવતાસાર્વભૌમાય શમ્ભવે પ્રભવે નમઃ ।
ત્વદન્યો વેદવેદ્યો ન ન ત્વદન્યઃ સુરેષ્ટદઃ ॥ ૫૦૮॥

ન ત્વદન્યઃ સદા સેવ્યો ન ત્વદન્યો જગત્પિતા ।
ત્વમેવ ભૂષણં રમ્યં ત્વમેવ મમ જીવનમ્ ॥ ૫૦૯॥

ત્વમેવ મમ માતાસિ ત્વમેવ હિ પિતા મમ ।
ત્વમારાધ્યતમઃ શમ્ભો મમ દેવોત્તમ પ્રભો ॥ ૫૧૦॥

ન ત્વદન્યપદદ્વન્દ્વમર્ચયામિ કૃપાનિધે ।
ન શૃણોમિ કથામન્યાં શિવનામવિવર્જિતામ્ ॥ ૫૧૧॥

શિવનામાન્યનામાનિ ન વદામિ મહેશ્વર ।
શિવલિઙ્ગં વિહાયાન્યં ન પશ્યાયિ ચ સાદરમ્ ॥ ૫૧૨॥

શિવલિઙ્ગં વિહાયાન્યદ્ધ્યાતં ચ ન કદાચન ।
અપરાધાન્ક્ષમસ્વેશ મમ શઙ્કર સર્વદા ॥ ૫૧૩॥

સ્વરૂપં તવ વિજ્ઞાસુ દુઃશકં નાત્ર સંશયઃ ।

વૈદૈઃ સર્વૈરપિ શ્રીમન્ તવ રૂપં સદાશિવ ॥ ૫૧૪॥

ન જ્ઞાતં તાદૃશં રૂપં મયા જ્ઞેયં કથં પ્રભો ।
લિઙ્ગસ્યાગ્રં મયા જ્ઞાતુમજ્ઞાનાદ્બ્રતમીશ્વર ॥ ૫૧૫॥

અપરાધં ક્ષમસ્વાદ્ય દીનવત્સલ શઙ્કર ।
પ્રણતં પાહિ માં શમ્ભો કરુણારસવારિધે ॥ ૫૧૬॥

માં ન મુઞ્ચ મહાદેવ પાહિ પાહિ સદાશિવ ।

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં શિવસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૦ । ૪૩૯.૨-૫૧૬.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 10 . 439.2-516.1..

Proofread by Ruma Dewan

---

*Brahmaproktam Shiva Stotram*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*